# ॐ श्री रक्षोघ्नमहामंत्रानुष्ठानम्
## (श्रीमद्भगवद्गीता अ० ११ श्लो ३६)

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः।।

ॐ अस्य श्री रक्षोघ्नमहामंत्रस्य भगवान् वेदव्यास ऋषिः, उपजातिनामकत्रिष्टुभ्छन्दः, श्रीकृष्णार्जुनौ परमात्मानौ देवते, ह्रीं बींजम्, श्रीं शक्तिः, क्लीं कीलकं, सर्वारिष्टनिवृत्यर्थे जपे विनियोगः।

अथ ऋष्यादिन्यासः:-
ॐ श्री भगवते वेदव्यासाय ऋषये नमः- शिरसि। ॐ श्री उपजातिनामकत्रिष्टुभ्छन्दसे नमः - मुखे। ॐ श्री कृष्णार्जुनाभ्यां देवताभ्यां नमः - हृदये। ॐ ह्रीं बींजाय नमः- गुह्ये। ॐ श्रीं शक्तये नमः- पादयोः। ॐ क्लीं कीलकाय नमः- नाभौ। ॐ सर्वारिष्टनिवृत्यर्थे जपे विनियोगगस नमः - सर्वांगे।

अथ करादिन्यासाः :-

| अथ मन्त्राः | अथ करन्यासः | अथ अंगन्यासः |
|---|---|---|
| ॐ ह्रां नमः | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| ॐ ह्रीं नमः | तर्जनीभ्यां नमः | शिरसे स्वाहा |
| ॐ ह्रूं नमः | मध्यमाभ्यां नमः | शिखायै वषट् |
| ॐ ह्रैं नमः | अनामिकाभ्यां नमः | कवचाय हुम् |
| ॐ ह्रौं नमः | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| ॐ ह्रः नमः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |

ॐ भूर्भुवःस्वरिति दिग्बन्धः।

अथ ध्यानम् :-
यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः सांगपदकमोपनिशदैर्गायन्ति यं सामगाः। ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः।।

ततः संकल्पानुसारेण आदौ नारायणाष्टाक्षरसुदर्शनास्त्राभ्यां संपुटीकृत्योक्तं श्लोकं जपेत्, अन्ते च शिवार्पणं कुर्यात्। अनुष्ठानान्ते दशांशं होमं विध्यनुसारेण कुर्यात्।

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः।।

इति मन्त्रं यथाशक्ति जपेत्ए स्वाहान्तेन दशांशं हूयात्।
अथवा -
ॐ नमो नारायणाय श्रीसुदर्शनायास्त्रराजाय फट् (जपार्थं), (फट् स्थाने स्वाहा होमार्थं)।

उपयोगः -
भूत, प्रेत, रक्षस, बालग्रह, आभिचारिक तंत्र-मंत्र, फणिहवन, इत्यादि बाधावशादुत्पन्नं पीडादिनिवारणार्थं। इति रक्षोघ्नमहामंत्रविधिः संपूर्णम्।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM